# ॥ भावोपहार स्तोत्रम् ।



नमः सूर्यकलाजालकालदेहापहारिणे ।

आधाराधेयपीठाय भवायाभवदायिने ॥ 1 ॥

नमः शिशुनिशाकान्तकलाकमलमालिने ।

परमानन्ददेहाय शिवायाव्यक्तमूर्तये ॥ 2 ॥

नमः पाशौघसंघट्टलयविश्लेषकारिणे ।

मन्त्रगर्भोदरस्थाय हराय परमात्मने ॥ 3 ॥

यद्यपि त्वं गुणातीतो वाक्पतेरप्यगोचरः ।

तथाप्या हृदयात्स्तोतुमुद्यता वाक्सदा मम ॥ 4 ॥

अतिभक्तिरसावेशविवशा विश्वतोमुख ।

त्वत्प्रेरिता यतो नाथ नापराधोऽस्ति मे क्वचित् ॥ 5 ॥

त्वत्पादाब्जरजःपूतचिताभूतिविभूषितात् ।

गृहाण मत्तः श्रीकण्ठ भावपूजामकृत्रिमाम् ॥ 6 ॥

हृत्पुष्कराख्ये स्नात्वान्तस्तीर्थे योगिनिषेविते ।

संबोधधौतवसनः श्यामकण्ठं यजाम्यहम् ॥ 7 ॥

प्रभूतभूतसंभूतशोणितैरर्घभाजनम् ।

क्रियते ते महाकालकायकंकालकन्दले ॥ 8 ॥

यद्यद्विकल्पनाजालं बाह्यार्थप्रतिपत्तये ।

तत्तद्द्वाराधिपकुलं तव पूज्यं मनस्विभिः ॥ 9 ॥

अशेषावरणोन्मुक्तगुप्तसौषुप्तमण्डले ।

पूज्यसे नगजाकान्त ग्रहणे चन्द्रसूर्ययोः ॥ 10 ॥

हानादानोदयारम्भसदसद्विभ्रमोज्झितम् ।

ज्ञप्तिमात्रप्रतिष्ठानमासनं त्रिजगत्पते ॥ 11 ॥

मूर्तिदानमनाभासशक्तिभासोपबृंहितम् ।

तुर्यपीठप्रतिष्ठानं वितरामि जगत्पते ॥ 12 ॥

दिक्कालदेशकलनाकलङ्कोज्झितचेतसः ।

कः करोति बुधः स्थाणोराह्वानादिविसर्जनम् ॥ 13 ॥

सूर्यशीतांशुनेत्राभ्यां मथित्वा शक्तिवारिधिम् ।

परामृतरसाभ्यङ्गं शिवाय विनिवेदये ॥ 14 ॥

इन्द्रियेष्विन्द्रियार्थेषु रागलोभानुयायिषु ।
निःस्नेहत्वं प्रभुत्वं च रुक्षमुद्वर्तनं तव ॥ 15 ॥

संशोध्यानच्छकलया बैन्धवं तीर्थमञ्जसा ।
तद्विरामरसस्नानं देयं चन्द्रार्धमौलये ॥ 16 ॥

स्वप्रबोधाम्बरोदारविकसद्वस्त्रघर्षणम् ।
विनिवेश्य भवत्संविद्विकारान् विकरामहे ॥ 17 ॥

ज्ञानज्ञेयपरित्यागनगनिर्झरविस्रुतम् ।
परमानन्ददं मेऽन्तस्तव पाद्यमनाबिलम् ॥ 18 ॥

अमन्दानन्दनिःष्यन्दस्पन्दमन्दिरकन्दरात् ।
गलत्कैवल्यसलिलमादत्स्वाचमनं विभो ॥ 19 ॥

प्रक्षाल्य धारणाम्भोभिर्ग्रन्थिपञ्चकमौक्तिकम् ।
अनर्घ्यमर्घं पादेभ्यः प्रयच्छामि वृषाकपे ॥ 20 ॥

तुरीयोद्यानविकसत्संवित्सौरभनिर्भरैः ।
गिरीश तिसृभिर्वाग्भिः स्तुतिपुष्पैः प्रपूज्यसे ॥ 21 ॥

प्राणवह्निशिखास्त्रेण भङ्क्त्वा ब्रह्मबिलं लसत् ।
धूपवर्तिनिभाभासो धूपस्ते नगजाधव ॥ 22 ॥

अनाहता नदत्यन्तर्या गौर्धाम्नि परे परा ।
सा घण्टा वाद्यते शम्भोरग्रे ग्रन्थार्थगर्भिणी ॥ 23 ॥

कन्दानलोल्लसच्छक्तिशिखां दीपशिखोपमाम् ।
उद्दीपयामि भगवन्मोहध्वान्तापनुत्तये ॥ 24 ॥

वृत्तित्यागामृतकलाचन्द्रश्चन्द्रकिरीटिनः ।
समालम्भनवेवास्तु मुमुक्षूणां विमुक्तये ॥ 25 ॥

नादशक्त्युदितं धाम मलत्रयविवर्जितम् ।
उष्णीषमस्तु ते रुद्र विद्रावितनभोऽर्गलम् ॥ 26 ॥

भवद्भक्तिसुधासारसंप्लावितहृदम्बुधेः ।
प्रोल्लसद्ब्रह्मकमलममलं तेऽस्तु शेखरम् ॥ 27 ॥

बोधारविन्दसंदोहो हर हारलता तव ।
नित्योदितान्तरव्याप्तिकला चन्द्रकला च ते ॥ 28 ॥

आकृष्यार्ककरैः शाक्तैर्विश्वाकाशकुशेशयात् ।
चिच्चन्द्रामृतनिःष्यन्दमास्वादय जगत्पते ॥ 29 ॥

मन्त्रं मनसि तच्छक्तौ तां स्वधाम्नि सदोदिते ।
कृत्वा जपविधिं सम्यक्शिवाय विनिवेदये ॥ 30 ॥

निःशेषार्थपरित्यागे ग्रहणे वामिताद्द्युते ।
अनाबिलं परां व्याप्तिं मुद्रां बध्नामि धूर्जटे ॥ 31 ॥

शष्कुलीकर्णयोर्बद्ध्वा यो रावोऽत्र विजृम्भते ।
तद्गीतमथ ते वाद्यमाद्यसंपुटघट्टनात् ॥ 32 ॥

भवद्भावरसावेशात्ताण्डवाडम्बरोद्धतः ।

मन्त्राध्वनि नदाम्यन्तः किमु बाह्यार्थभावनैः ॥ 33 ॥

अखण्डमण्डलाकारशिवताभावनाम्बरम् ।

उपरिष्टान्मया शम्भोर्वितानमुपकल्पितम् ॥ 34 ॥

रेचयित्वा करन्ध्रेण भाचक्रं हृदयाम्बरात् ।

धार्यते धूर्जटेरग्रे चारुचामरवन्मया ॥ 35 ॥

नासापुटकुटीकोटिविसृतैः प्रसृतैः पुरः ।

तालवृन्तैरिव विभो वीज्यसे हंसमारुतैः ॥ 36 ॥

सर्वातपविनिर्मुक्तं  भवद्भक्तिसुधासितम् ।

आतपत्रमथास्माभिर् धार्यते ते महाशय ॥ 37 ॥

ममतामन्दुरात्यागात्त्रैलोक्याकर्षणक्षमः ।

अहंकारतुरङ्गस्ते  वाहनाय प्रकल्पितः ॥ 38 ॥

स्वसंविन्नन्दनानन्दनागवल्लीदलोज्ज्वलम् ।

स्फुरत्स्पन्देन्दुसुरभि  ताम्बूलं ते निवेद्यते ॥ 39 ॥

भोग्यभोक्तृविभेदोत्थवासनेन्धनसंचयम्

अद्वैताग्नौ जुहोम्यन्तः  शांकरे स्त्रेयसां निधौ ॥ 40 ॥

प्रकाशाकाशहस्ताभ्याम्  अवलम्ब्योन्मनास्त्रुचम् ।

धर्माधर्मगलत्स्नेहपूर्णां वह्नौ जुहोम्यजे ॥ 41 ॥

युष्मद्ध्याननिशानाथकिरणैरुपरञ्जितः ।

अन्तर्मानविधौ तेऽस्तु  चित्तचिन्तामणिर्मम ॥ 42 ॥

मोक्षलक्ष्मीकराम्भोजपात्रे विन्यस्य संस्कृताम् ।

निवेदयामि भगवन्  प्राणसर्वस्वदक्षिणाम् ॥ 43 ॥

संसारवारिधेः सन्तः  परं पारं तितीर्षवः ।

चन्द्रमौलेः श्रयन्तूच्चैर् भावपूजातरण्डकम् ॥ 44 ॥

इत्थमीशानचरणनुतेर्यत्समुपार्जितम् ।
श्रेयस्तेन जगत्कृत्स्नं  द्वेषदोषाद्विमुच्यताम् ॥ 45 ॥

स्तोत्रं गृहाण परमेश्वर विश्वसाक्षिन्
मानावमानमतोज्झितचित्तवृत्तेः ।
मत्तस्त्वदङ्घ्रियुगपीठनिलीन
-मौलेर्भस्मावगुण्ठिततनोर्नृकपालपाणेः ॥ 46 ॥

महापाशुपतोद्याने  कश्चिद्विश्रम्य तापसः ।
चक्रे चिच्चक्रनाथस्य  शम्भोर्भावनुतिं पराम् ॥ 47 ॥

॥ इति श्रीचक्रपाणिनाथविरचितं भावोपहार स्तोत्रम् ॥

www.kamakotimandali.com